Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

A/C. NO.	NEW	193	OLD	179
FOLIO	0/4			

TITLE

तर्कामृत ತರ್ಕಾಮೃತ
Tarkamṛta

[illegible] — ८२४५—६५—

अथतर्कामृतप्रारंभः॥

तर्को श्रीगणेशायनमः॥ब्रह्माद्यानिखिलार्चिताखिलदृशसंदोहाःसदाभीष्टदाःस्वाज्ञानप्रशमाययत्रमनसो
१ वृत्तीःसमस्तादधुः॥श्रीविश्वेश्वरपादांबुजंभवभयध्वंसैकबीजंपरंहृत्स्थंविनिधायतन्निरुपमंतर्का
मृतंतन्मते॥१॥अथश्रुतिःश्रूयते॥आत्मावारेद्रष्टव्यः॥श्रोतव्योमंतव्योनिदिध्यासितव्यइति॥अस्या
र्थः॥मुमुक्षुणात्माद्रष्टव्यःमुमुक्षोरात्मदर्शनमिष्टसाधनमितियावत्॥आत्मदर्शनोपायःकइत्याह॥
श्रोतव्यइत्यादि॥तेनार्थक्रमेणशाब्दक्रमस्यबाधोभवति॥अग्निहोत्रंजुहोतियवागूंपचतीत्यादि
वत्॥तथाचश्रवणमनननिदिध्यासनानितत्त्वज्ञानजनकानीत्युक्तंभवति॥अत्रश्रुतितःकृतात्म
श्रवणस्यमननेअधिकारः॥मननंचात्मनइतरभिन्नत्वेनानुमानं॥तच्चभेदप्रतियोगीतरज्ञानसा
ध्यं॥तथाचतदुपयोगितदर्थंपदार्थनिरूपणंसंक्षेपतः॥सामान्यतःपदार्थोद्विविधः॥भावोभावश्च॥
भावःषड्विधः॥द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात्॥तत्रद्रव्यत्वगुणत्वकर्मत्वानिजातयः
॥सामान्यत्वादीन्युपाधयः॥द्रव्याणिनव॥पृथिव्यप्तेजोवाय्वाकाशकालदिगात्मामनांसि॥आ
काशत्वकालत्वदिक्त्वान्युपाधयः॥अन्यानिजातयः॥तत्ररूपरसगंधस्पर्शसंख्यापरिमाणपृथ स्मृति १
क्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्काराश्चतुर्दशगुणाः॥पृथिव्यां॥तत्रैवगंधंविहायस्ने

हंविनिये चचतुर्दशगुणाजलस्य॥रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्र
वत्वसंस्काराः एकादशगुणास्तेजसः॥स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसं
स्कारा नवगुणा वायोः॥शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागाः षड्गुणा आकाशस्य॥
संख्यापरिमाणपृथक्त्वसंयोगविभागाः पंचगुणाः कालदिशोः॥संख्यापरिमाणपृथक्त्वसंयोगवि
भागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्दशगुणाः आत्मनः॥संख्यापरिमा
णपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारा अष्टौमनसः॥ज्ञानेच्छाकृतिसंख्यादिपंचकम
ष्टौगुणा ईश्वरस्य॥तथा चोक्तं वायोर्नवैकादशतेजसोगुणाजलक्षितिप्राणभृतांचतुर्दश॥दिक्कालयोः
पंचषडेवचांबरेमहेश्वरेष्टौमनसस्तथैवच॥तत्रपृथिवीजलतेजोवायवोद्विविधाः॥परमाणवः
सावयवाश्च॥आकाशकालात्मदिशो विभुरूपाः॥मनः परमाणुरूपं॥तत्रसावयवाअनित्याः
इतराणिनित्यानि॥सावयवापित्रिविधाः॥शरीरेंद्रियविषयभेदात्॥मानुषाणांशरीरंपार्थिवं॥ज
लीयंशरीरंवरुणलोकेप्रसिद्धं॥तैजसंशरीरमादित्यलोकेवायवीयंशरीरंवायुलोके॥घ्राणेंद्रियं
पार्थिवं॥रसनेंद्रियंजलीयं॥चक्षुरिंद्रियंतैजसं॥त्वगिंद्रियंवायवीयं॥श्रोत्रेंद्रियंकर्णशष्कुल्य

ना

तर्कामृत २ वछिन्नोनभःप्रदेशः॥एतानिपंचबहिरिंद्रियाणि॥मनोंतरिंद्रियंतेनषडिंद्रियाणि॥विषयाश्चशब्दादि
रूपेणप्रसिद्धाः॥आत्माद्विविधः॥जीवात्मा॥परमात्माच॥तत्रजीवात्मानःप्रतिशरीरंभिन्नाःबंधमोक्ष
योग्याःपरमात्माईश्वरः अथाप्रत्यक्षप्रत्यक्षद्रव्याणिपरमाणुद्व्यणुकेअप्रत्यक्षे॥उद्भूतरूपवत्वंयत्रता म ह लो
निपृथिवीजलतेजांसिप्रत्यक्षाणि॥आत्माचप्रत्यक्षः॥वाय्वाकाशकालदिङ्मनांसिअप्रत्यक्षाणि॥
बाह्यद्रव्यप्रत्यक्षंप्रतिमहत्वेसतिउद्भूतरूपवत्वंप्रयोजकं॥अथद्रव्योत्पत्तिप्रक्रियातत्रोत्पत्तिःकारण
कार्य ५ वतांअन्यथासिद्धंनियतपूर्ववृत्तिकारणंतच्चकारणत्वं॥त्रिविधंकारणानि॥समवायिकारणास
समवायिकारणनिमित्तकारणानि॥यत्समवेतंकार्यमुत्पद्यतेतत्समवायिकारणं॥यथापरमाणुर्द्व्यणु २
कपालद्वयस्य कस्य॥समवायिकारणेसंबद्धंकारणंअसमवायिकारणं॥यथापरमाणुद्वयसंयोगोद्व्यणुकस्य॥कपा
लरूपंघटरूपस्य॥एतदुभयभिन्नकारणंनिमित्तकारणं॥यथाद्व्यणुकेईश्वरः॥घटेदंडः॥एतत्कार
णत्रयंभावकार्यमात्रस्य॥तत्रसमवायिकारणंसर्वत्रद्रव्यमेव॥असमवायिकारणंद्रव्येगुणः॥गुणेगु तर्कामृतं
णःकर्मच॥कार्यमात्रंप्रतिसाधारणकारणानिईश्वरः॥तज्ज्ञानेच्छाकृतयःप्रागभावकालदिगदृष्टानि २
तत्रपरमाणुद्वयसंयोगात्द्व्यणुकमुत्पद्यते॥संयुक्तद्व्यणुकत्रयात्त्रसरेणुः॥एवंचतुरणुकादिक

पालांतं॥कपालद्वयसंयोगेनघटोजायते॥घटस्संयावयवी॥अथद्रव्यप्रमाणंकथ्यते॥प्रत्यक्षद्रव्येप्रत्यक्षमे
वप्रमाणं॥अतींद्रियेअनुमानं॥तत्पक्षहेतुसाध्यदृष्टांतज्ञानसाध्यं।विशेषोवक्ष्यते।परमाणुद्व्यणुकानु
मानंयथा॥त्रसरेणुःसावयवद्रव्यारब्धःबहिरिंद्रियवेद्यद्रव्यत्वात्।बहिरिंद्रियवेद्यद्रव्यंयत्तत्सावयवद्र
व्यारब्धं।यथाघटः॥अत्रत्रसरेणुःपक्षः।सावयवद्रव्यारब्धत्वंसाध्यं।बहिरिंद्रियवेद्यद्रव्यत्वादितिहेतुः।
घटोदृष्टांतः।अनेनद्व्यणुकंपरमाणुश्चसिध्यति॥आकाशवायूशब्देनस्पर्शेनचानुमीयते॥शब्दोद्रव्याश्रि
तोगुणत्वात्।यथाघटरूपं॥अनेनद्रव्यांतरबाधात्शब्दाश्रयत्वेनाकाशंसिध्यति॥पृथिव्यादित्रयावृत्तिरयं
स्पर्शोद्रव्याश्रितोगुणत्वादित्यनुमानेनद्रव्यांतरबाधात्॥स्पर्शाश्रयत्वेनवायुःसिध्यति॥कालप्रमाणंयथा॥
परत्वापरत्वेद्विविधे।कालिकेदैशिकेच॥परत्वोत्पत्तिश्चबहुतरविक्रियाविशिष्टशरीरज्ञानात्॥अप
रत्वोत्पत्तिश्चस्वल्पतरविक्रियाविशिष्टशरीरज्ञानात्॥तत्परत्वंज्येष्ठत्वं अपरत्वंकनिष्ठत्वं।तदनुमानं
यथा॥परत्वजनकबहुतरविक्रियाविशिष्टशरीरज्ञानमिदंपरंपरासंबंधघटकसापेक्षं॥साक्षा
त्संबंधाभावेसतिविशिष्टज्ञानत्वात्।लोहितःस्फटिकइतिप्रत्ययवत्॥परंपरासंबंधश्चार्क
विक्रियाःस्वसमवायिसंयुक्तसंयोगः।तेनसंबंधघटकंतयाकालःसिध्यति।ननुका

पत्रसंख्या ३

मान
तर्कामृत तस्यभूतभविष्यद्वर्तनेदेनबहुत्वात्कुतएकत्वमितिचेन्न॥उपाधिभेदेनभेदप्रत्ययात्॥कालोपा
३ धयएवविक्रियादिरूपाभिन्नाएव॥दैशिकपरत्वापरत्वाभ्यांदिशःसिद्धिः॥तच्चदूरत्वसमी
पत्वे॥अवधिसापेक्षबहुतरसंयोगविशिष्टशरीरज्ञानमिदंकजनंपरंपरासंबंधघट
कसापेक्षमित्यादिपूर्ववत्॥तेनचदिशःसिद्धिः॥नचाकाशमेवसंबंधघटकमस्तामितिवाच्यं॥
क तस्यशब्दाश्रयत्वेनैवधर्मिग्राहकप्रमाणसिद्धत्वात्नरविक्रियाद्युपनायकत्वसंभवः॥अहंसुखीत्या
दिप्रत्यक्षमात्मनिप्रमाणं॥ईश्वरेचानुमानं॥यथाक्षितिःसकर्तृका॥कार्यत्वात्॥घटवत्॥तेनईश्व
रस्यतद्वृत्तिनित्यज्ञानेच्छाकृतीनांतत्सर्वज्ञत्वस्यचसिद्धिः॥मनसिप्रमाणंतुयथा॥सुखादिप्रत्यक्षमिं
द्रियजन्यं॥जन्यप्रत्यक्षत्वात्॥घटप्रत्यक्षवत्॥तथाचेंद्रियांतरबाधेमनसःसिद्धिः॥अथद्रव्यनाशप्रक्रिया॥
द्रव्यनाशोद्विविधः॥कचिदसमवायिकारणनाशात्॥कचित्समवायिकारणनाशाच्च॥तत्राद्योयथा॥
परमाणुद्वयसंयोगनाशात्द्व्यणुकनाशः॥द्वितीयोयथा॥कपालनाशाद्घटनाशः॥घटनाशउत्प तर्कामृत
यतःसंभवति॥आकाशकालदिगात्मपरमाणवोऽष्टतयः॥समवायश्चपृथिव्यादिपंचानांभूतत्वं॥ ३

दिशादैशिकसंबंधेनसर्वाधिकरणत्वं॥
पृथिवीजलतेजोवायुमनसांक्रियावत्वंमूर्तत्वं॥पृथिवीजलतेजोवायवोद्रव्यसमवायिकारणानि॥का
लस्यकालिकसंबंधेनसर्वाधिकरणत्वं॥अथगुणाःकथ्यंते॥रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसं
योगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्वि
शतिगुणाः॥अत्ररूपत्वादीनिसर्वाण्येवजातयः॥रूपंपृथिव्यादित्रयवृत्तितच्चशुक्लनीलरक्तपीतचित्रा
अभास्वर
दिभेदेनबहुविधं॥पृथिवीवृत्ति॥स्वच्छंशुक्लंरूपंजलवृत्ति॥शुक्लंभास्वरंरूपंतेजोवृत्ति॥रसःपृथिवीजलवृ
त्तिः॥तत्रमधुरलवणकटुकषायतिक्ताम्लाःषड्विधाःरसाःपृथिव्यां॥जलेमधुरएवरसः॥गंधोद्विविधः॥
सुरभिरसुरभिश्च॥पृथिवीमात्रवृत्तिः॥स्पर्शश्चपृथिव्यादिचतुष्टयवृत्तिः॥सत्रिविधः॥अनुष्णाशीतः॥
शीतउष्णश्च॥अनुष्णाशीतस्पर्शोवायुपृथिव्योः॥जलेशीतः॥तेजस्युष्णः॥संख्यापरिमाणपृथक्त्व
संयोगविभागाःनवद्रव्यवृत्तयः॥परत्वापरत्वेपृथिवीजलतेजोवायुमनोवृत्तिनी॥बुद्धिसुखदुःखेच्छा
द्वेषकृतिभावनाधर्माधर्माआत्मवृत्तयः॥गुरुत्वंपृथिवीजलवृत्ति॥द्रवत्वंपृथिवीजलवृत्तितेजोवृ
त्ति॥तद्द्विविधं॥नैमित्तिकंसांसिद्धिकंच॥आद्यंपृथिवीतेजसोः॥द्वितीयंजले॥स्नेहोजलमात्रवृत्तिः॥

संस्कारः पृथिवीजलतेजोवाय्वात्ममनोवृत्तिः॥ सच त्रिविधः॥ वेगो भावना स्थितिस्थापकश्च॥ तत्र वेगः पृ
थ्व्यादिचतुष्कमनोवृत्तिः॥ द्वितीय आत्मवृत्तिः॥ त्रितीयः पृथिव्यादिचतुष्टयवृत्तिः॥ शब्दो द्विविधः॥ वर्णात्म
को ध्वन्यात्मकश्च॥ आकाशमात्रवृत्तिः॥ रूपरसगंधस्पर्शस्नेहसांसिद्धिकद्रवत्वशब्दबुद्धिसुख
दुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाविशेषगुणाः॥ तथाचोक्तं॥ रूपंगंधोरसः स्पर्शः स्नेहः सांसि
द्धिको द्रवः॥ बुद्ध्यादिर्भावनांतश्च शब्दो वैशेषिका गुणाः॥१॥ संख्यापरिमाणपृथक्त्वसंयोगविभा
गपरत्वापरत्व गुरुत्वनैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः॥ अथ नित्यगुणाः॥
जलतेजोवायुपरमाणूनां विशेषगुणाः॥ परमाणुवृत्तिगुरुत्वं स्थितिस्थापकश्च॥ विभूनां परमा
णूनां चैकत्वपरिमाणपृथक्त्वानि॥ ईश्वरेच्छाज्ञानकृतयश्च नित्यगुणाः॥ अथाप्रत्यक्षगुणाः॥ गुरुत्वध
र्माधर्मभावनास्थितिस्थापकाः॥ परमाणुद्व्यणुकवृत्तिगुणाः॥ अतींद्रियवृत्तिसामान्यगुणाः॥ त्रसा
गंध २ रेणुरूपं विहाय ये गुणास्ते अतींद्रियाः॥ रूपरसस्पर्शस्नेहप्रत्यक्षे महद्वृत्तित्वे सत्युद्भूतत्वं प्रयोजकं॥ सा तर्कस्मृति
मान्यगुणप्रत्यक्षे आश्रयप्रत्यक्षं॥ बुद्धिप्रत्यक्षे स्ववृत्तिविशिष्टज्ञानत्वं॥ सुखादिप्रत्यक्षे स्ववृत्तिसु ६

सर्व

स्वत्वादिकमेव॥ अंत्याद्यशद्वौविद्धायंशाब्दः प्रत्यक्षः॥ अथगुणोत्पत्तिप्रक्रिया॥ अवयववृत्तिविशे
षगुणा अवयविनिस्वसमानजातीयगुणानारभंते॥ पृथिवीविशेषगुणाःपाकजाःतेद्विविधाः
॥पाकप्रयोज्याः॥पाकजन्याश्च॥कारणगुणप्रक्रमजन्याःपाकप्रयोज्याः॥ अग्निसंयोगज
न्याद्वितीयाः॥श्यामघटस्याग्निसंयोगेनश्यामरूपनाशानंतरंघटेरक्तंरूपंउत्पद्यतेइतिनैया
यिकमतं॥अग्निसंयोगेनपरमाणुपाकेसतिपरमाणौरक्तंरूपमुत्पद्यते॥पुनर्घटोत्पत्तौसत्यां
कारणगुणप्रक्रमेणघटेरक्तंरूपमुत्पद्यतेइतिवैशेषिकमतं॥कपालंनीलमेकमेकंचपीतंय
दितदाघटेचित्ररूपमुत्पद्यते॥रसादावेवंसति अवयविनिरसोनजायतेचित्ररसाद्यस्वीकाराद्
गुरुत्वस्थितिस्थापकयोश्चकारणगुणप्रक्रमजन्यता॥द्वित्वादयोपेक्षाबुद्धिजन्याः॥परिमाणं
चतुर्विधं॥अणुमहत्ह्रस्वंदीर्घंच॥कारणगुणप्रक्रमजन्यं॥स्वावयवबहुत्वजन्यं॥यथात्रसरेणू
नांअवयवानांशिथिलसंयोगःप्रचयोपितज्जनकः॥यथातूलपरिमाणे॥पृथक्त्वंकारणगुण
प्रक्रमजन्यं॥ननुतत्रकिंप्रमाणं॥घटात्पटःपृथगितिप्रत्यक्षंतस्यान्योन्याभावविषयकत्वाद्

अवयवबहुत्वं[illegible]चमहत्वजनकं

तर्कस्मृति तिचेन्न ॥ अन्योन्याभावप्रतीतेरनुयोगिप्रतियोगिनोः समानविभक्तिकत्वनियमात् ॥ यथा घटो
५ न पट इत्यन्योन्याभावस्य पृथक्त्वरूपत्वे घटात्पटो न इत्यपि प्रयोगापत्तेः ॥ न चैवं घटादन्यः पट इत्य
त्र कथमन्योन्याभावप्रतीतिरिति वाच्यं ॥ अन्यत्वस्यापि पृथक्त्वरूपत्वात् ॥ संयोगस्त्रिविधः ॥ अ
न्यतरकर्मजः उभयकर्मजः संयोगजश्च ॥ आद्यो यथा मनःकर्मणा मनसः संयोगः ॥ द्वितीयो
यथा मेषयोः कर्मणा तयोः संयोगः ॥ तृतीयो यथा कारणाकारणसंयोगात्कार्याकार्यसंयोगः
हस्ततरुसंयोगेन कायतरुसंयोगः ॥ विभागस्त्रिविधः ॥ अन्यतरकर्मजः ॥ उभयकर्मजः ॥ वि
भागजश्च ॥ आद्यो यथा मनःकर्मणा आत्ममनसोर्विभागः ॥ द्वितीयो यथा मेषयोः कर्मणा तयो-
र्विभागः ॥ विभागजविभागो द्विविधः ॥ कारणमात्रविभागजः ॥ कारणाकारणविभागजश्च ॥ आद्यो
यथा कपालकर्मणा कपालद्वयविभागः ॥ ततः कपालद्वयसंयोगनाशः ॥ ततो घटनाशः ॥ ततः क
विभागः पालस्याकाशादिदेशाद्विभागो विभागजः ॥ न च विभागः स्वोत्पत्त्यनंतरमेव विभागजविभागजन तर्कस्मृति
यतीति वाच्यं ॥ द्रव्यनाशसहकृतस्यैव तस्य तज्जनकत्वात् द्रव्यस्य प्रतिबंधकत्वेन सति द्रव्ये तदसं ५

भावात्॥नचकर्मैवएकदाकपालद्वयविभागमाकाशकपालविभागंचजनयतीतिवाच्यं॥यद्द्र
व्यारंभकसंयोगवि[...]रोधिनंविभागमारभतेतन्नतद्द्रव्यारंभकसंयोगविरोधिनं॥यथाविकस कमल
कुड्मल[illegible]द्रव्यकर्मेतिव्याप्तेः॥नचसंयोगेप्यवमस्तुतत्राविरोधात्॥द्वितीयस्तुकारणाकारणवि
भागात्कार्याकार्यविभागः॥हस्ततरुविभागात्कायतरुविभागः॥परत्वापरत्वोत्पत्तिःकालप्रकरणउक्ता॥
बुद्धिर्ज्ञानं॥तद्द्विविधं॥स्मरणमनुभवश्च॥स्मरणंद्विविधं॥यथार्थंअयथार्थंच॥तद्वतितत्प्रकार
कत्वंयथार्थत्वं॥तदभाववतितत्प्रकारकत्वंअयथार्थत्वं॥पूर्वानुभवसंस्कारद्वारास्मरणंजनयति॥
तत्रपूर्वानुभवस्ययथार्थत्वायथार्थत्वाभ्यांस्मरणमुभयरूपंभवति॥अनुभवोद्विविधः॥प्रमा
अयथार्थश्च॥तत्रप्रमाचतुर्विधा॥सावक्ष्यते॥अयथार्थज्ञानंचतुर्विधं॥संशयोविपर्ययःस्वप्नोन
ध्यवसायश्च॥संशयोयथा॥समानधर्मवद्धर्मिज्ञानविशेषादर्शनकोटिस्मरणैः॥अयंस्थाणुर्वा द्वय
पुरुषोवेतिज्ञानंजन्यतेसएवसंशयः॥विपर्ययस्तुसमानधर्मवद्धर्मिज्ञानविशेषादर्शनैककोटि
स्मरणैः॥शुक्ताविदंरजतमितिज्ञानंजन्यते॥तत्रगुरुमतेइदमितिअनुभवात्मकंज्ञानंरजतमितिस्म

तर्कस्मृतिः रणात्मकं तेन ग्रहणास्मरणात्मकं ज्ञानद्वयं न तु रजतत्व विशिष्टज्ञानमिति अन्यस्यान्यथाभान
६ सामग्र्यभावात्॥ प्रवृत्तिश्च स्वतंत्रोपस्थितेष्टभेदाग्रहात्॥ नैयायिकमते प्रवर्त्तकं विशिष्टज्ञानं तेन भ्र
मः सिध्यति॥ स्वप्नस्तु अनुभूतपदार्थस्मरणयोरदृष्टेन धातुदोषेण जन्यते॥ अनुव्यवसायश्च किंचि स्वि
द्विदमिति ज्ञानं विशेषादर्शनाद्भवति॥ अत्र यद्ययं निर्वह्निः स्यात्तदा निर्धूमः स्यादिति तर्को विपर्यय
मध्ये बोध्यः॥ तत्र नैयायिकमते स्वप्नानुव्यवसायौ विपर्ययमध्ये प्रविष्टौ॥ तेन तन्मते यथार्थज्ञानं द्वि
विधं संशयो विपर्ययश्चेति॥ सुखं धर्मजन्यं दुःखं अधर्मजन्यं॥ इच्छा इष्टसाधनताज्ञानजन्या॥ द्वेषो
सा निष्टसाधनत्वज्ञानजन्यः॥ कृतिस्त्रिविधा॥ जीवनयोनियत्नरूपा प्रवृत्तिनिवृत्तिश्च॥ आद्या जीव
नादृष्टजन्या॥ द्वितीया इच्छाजन्या॥ तृतीया द्वेषजन्या॥ धर्मः श्रुतिविहितकर्मजन्यः॥ अधर्मः श्रुति
विरुद्धाचरणजन्यः॥ वेगाख्यः संस्कारः॥ आद्यक्रियाजन्यो द्वितीयादिक्रियाजनकः॥ यथा वे तर्कस्मृति
गेन बाणश्चलतीति॥ भावनाख्यः संस्कारो विशिष्टज्ञानजन्यः॥ स्थितिस्थापकाख्यः कारणगु ६
णप्रक्रमजन्यः॥ गुरुत्वं कारणगुरुत्वजन्यं॥ नैमित्तिकं द्रवत्वं जतुघृतसुवर्णादीनां अग्निसं

योगजन्यं॥स्नेहःकारणगुणप्रक्रमजन्यः॥शब्दस्त्रिविधः॥संयोगजोविभागजःशब्दजश्च॥आद्योभे
रीदण्डसंयोगजन्यः॥द्वितीयोवंशादिदलद्वयविभागजन्यः॥तृतीयस्तुसंयोगेनविभागेनवाअद्यश
ब्देजनितेतेनशब्देननिमित्तवायुसहकृतेनवीचीतरंगन्यायेनकदंबगोलकन्यायेनवाजन्यते॥
उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानिपंचकर्माणि॥उत्क्षेपणत्वादीनिजातयः॥पृथिवीजल
तति तेजोवायुमनोवृत्तीनिकर्माणि॥सर्वाण्यनित्यानि॥अतींद्रियवृत्तीन्यतींद्रियाणि॥प्रत्यक्षवृत्तीनिप्रत्यक्षा
णि॥अथकर्मप्रक्रिया॥संयोगेननोदनाख्येनाद्यंकर्मजन्यते॥द्वितीयादिवेगजन्यं॥क्रियातोवि क्रिया
भागःविभागात्पूर्वसंयोगनाशःततउत्तरसंयोगःततःकर्मविभागयोर्नाशः॥सामान्यंत्रिविधं
॥व्यापकंव्याप्यंव्याप्यव्यापकंचव्यापकंसत्ता॥व्याप्यंघटत्वादि॥द्रव्यत्वादिव्याप्यंव्यापकंच॥व्य
क्तेरभेदस्तुल्यत्वंसंकरोथानवस्थितिः॥रूपहानिरसंबंधोजातिबाधकसंग्रहः॥नित्यत्वेसत्यने
कसमवेतत्वमितिसामान्यलक्षणं॥सामान्यानिनित्यान्येव॥अतींद्रियवृत्तीन्यतींद्रियाणि॥प्रत्यक्ष
वृत्तीनिप्रत्यक्षाणि॥नित्यद्रव्यवृत्तयोयाविशेषाः॥तेचबाहवोनित्याः॥अतींद्रियाश्च॥प्रलयेपरमाणूनां

स्व

तर्कामृति भेदायतस्त्वीक्रियंते॰ तेषां वैधर्म्यापत्त्वादिति॰ संबंधिभिन्नो नित्यः संबंधः समवायः॥ तेन स्वरूपसं

७ बंधस्य संयोगस्य च निरासः॥ इह घटे घटत्वमिति प्रतीतिस्तत्र प्रमाणं॥ नैयायिकमते समवायः प्र

त्यक्षो नित्यश्च॥ नन्वन्यान्यपि अंधकारसुवर्णादीनि द्रव्याणि संति आलस्यादयो गुणा अपि संति

कथं न वैवस्यादि॥ मैवं॰ अंधकारो न द्रव्यं किंतु तेजोऽभावः॥ सुवर्णं तेज एव॥ आलस्यं कृत्यभावः

॥ एवमन्यदपि॰ अभावो द्विविधः॥ संसर्गाभावो अन्योन्याभावश्च॰ आद्यस्त्रिविधः॥ प्राग

भावो ध्वंसोऽत्यंताभावश्च प्रागभावो विनाशी अजन्यः॥ ध्वंसो जन्यो विनाशी॥ अत्यंतान्योन्याभावा

वजन्यौ॥ अविनाशिनौ॥ योग्यानुपलब्ध्याभावः प्रत्यक्षः॥ अन्यत्रातींद्रियः॥ अथ प्रमा कथ्यते॥

५ सा प्रमा चतुर्विधा॥ प्रत्यक्षानुमित्युपमितिशाब्दरूपा॥ तत्करणानि प्रमाणानि चत्वारि॥ प्रत्यक्षानु

५३ मानोपमानशब्दभेदात्॥ तत्र प्रत्यक्षं द्विविधं॥ निर्विकल्पकं सविकल्पकं च॥ प्रत्यक्षकरणानि ष तर्कामृति

डिंद्रियाणि॥ घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि॥ एतानि संनिकर्षसहितानि प्रत्यक्षं जनयंति॥ सं ७

निकर्षश्च लौकिकोऽलौकिकश्च॥ अलौकिकस्त्रिविधः॥ ज्ञानलक्षणासामान्यलक्षणायोगज ध

द्विविधः

मेस्य॰लौकिकः षड्विधः॥संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः॥समवायः॥समवेत ८१
समवायः॥विशेषणताचेति॥संयोगेनद्रव्यग्रहः॥संयुक्तसमवायेनद्रव्यगुणकर्मवृत्तिजाती
नांप्रत्यक्षं॥संयुक्तसमवेतसमवायेनशब्दमात्रवृत्तिजातीतरगुणवृत्तिजातिकर्मवृत्तिजातीनां
प्रत्यक्षं॥समवायेनशब्दस्य॥समवेतसमवायेनशब्दवृत्तिजातेः॥विशेषणतयाभावस्यसम
वायस्यच॥अलौकिकः सयथा॥ज्ञानलक्षणयासुरभिचंदनमितिचाक्षुषज्ञानं॥सामान्यल
क्षणयाघटत्वेनरूपेणयावद्घटज्ञानं॥योगजधर्मेणयोगिनांसर्वज्ञानं॥तत्रनिर्विकल्पकंविशेष्य
प्रकारादिरहितवस्तुस्वरूपमात्रज्ञानं॥सविकल्पकंसप्रकारकं॥भासमानवैशिष्ट्यप्रतियोगि
त्वंचप्रकारत्वं॥[illegible]॥यथाअयंघटइत्यत्रायंविशेष्यः घटत्वंप्रकारः॥भासमानवैशिष्ट्यंएतयोः
समवायः॥तस्यप्रतियोगिघटत्वंसविकल्पकमेवविशिष्टवैशिष्ट्यज्ञानं॥यथादंडीयत्रदंडत्वविशि
प्रमा ष्टस्यवैशिष्ट्यंपुरुषेभासते॥अथप्रक्रिया॥आदौइंद्रियसंनिकर्षात्घटघटत्वेइतिनिर्विकल्पकं
ततोऽयंघटइतिविशिष्टज्ञानं॥तत्रपरतःप्रामाण्यग्रहइतिनैयायिकाः॥यथाआदौअयंघट

तर्कस्मृति इतिव्यवसायःततोघटमहंजानामीत्यनुव्यवसायः॥ततःप्रामाण्याप्रामाण्येइतिकोटिद्वयस्मरणं॥अ
८ यचतुर्थेइदंज्ञानं॥मींप्रनवेतिप्रामाण्यसंशयः॥ततोविशेषदर्शनानंतरंप्रामाण्यग्रहः॥इदंज्ञानं॥
प्रमा॥समर्थप्रवृत्तिजनकत्वात्॥ज्ञानांतरवत्॥स्वतःप्रामाण्यग्रहइतित्रयोमीमांसकाः॥तत्रगुरुम
अ तेऽयंघटइतिज्ञानंविषयंत्रात्मानंज्ञानंप्रामाण्यंचगृह्णाति॥मुरारिमिश्रमतेऽयंघटइतिज्ञाना
नंतरंघटमहंजानामीत्यनुव्यवसायत्वेनैवप्रामाण्यग्रहः॥भट्टमतेज्ञानस्यातींद्रियत्वेनज्ञानम
नुमेयंयथातथातेनैवप्रामाण्यं॥यथाऽयंघटइतिज्ञानानंतरंघटेज्ञातताउत्पद्यतेततोघ
ज्ञातोमयाघटइतिज्ञाततापत्यक्षं॥ततोआप्यादिप्रत्यक्षानंतरंज्ञानानुमानं॥यथाहंघटत्व
क प्रकारकज्ञानवान्घटत्वप्रकारज्ञाततावत्वात्तस्यधर्मधर्मिविषयकत्वेनप्रामाण्यानुमानं॥
अनुमितिकरणंअनुमानं॥अनुमितित्वंजातिः॥व्यापारवत्कारणंकरणं॥व्यापारश्चतज्जन्य
त्वेसतितज्जन्यजनकः हेतुज्ञानादिकरणं॥परामर्शोव्यापारः॥परामर्शश्च॥व्याप्तिविशिष्टपक्षध तर्कस्मृति
र्मताज्ञानं॥यथावह्निव्याप्यधूमवानयमिति॥आदौमहानसादौधूमवह्निसामानाधिकरण्य ८

प्रदेसतिधूमोवन्हिव्याप्यइत्यनुभवोजन्यते।।ततःकालांतरेपर्वतेधूमेदृष्टेसतिव्याप्तिस्मरणंततश्चवि
शिष्टवैशिष्ट्यज्ञानंवन्हिव्याप्यधूमवान अयंमितितृतीयलिंगपरामर्शः पक्षतासहितेनतेनपर्वतो
वन्हिमानित्यनुमितिर्जन्यते।।व्याप्तिश्चहेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामाना
धिकरण्यं।।नचअयं।।संयोगवान्द्रव्यत्वादित्यत्राव्याप्तिः।।प्रतियोग्यव्यधिकरणहेतुसमाना
धिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यमित्यर्थात्।।पक्षताचसिषाधयिषावि
रहसहकृतसिद्ध्यभावः।।अनुमानंद्विविधं।।स्वार्थंपरार्थंच।।तत्रपरार्थंपंचावयवसाध्यं।।अव
यवाश्चप्रतिज्ञाहेतूदाहरणोपनयनिगमनानि।।पर्वतोवन्हिमान।।धूमात।।यत्रयत्रधू
मःतत्रतत्रवन्हिः।।यथामहानसः।।वन्हिव्याप्यधूमवानयं।।तस्माद्वन्हिमान।।स्वार्थंचस्वीय
व्याप्त्यादिज्ञानसाध्यं।।नतत्रपरप्रतिपत्त्यर्थमिवओदासत्राह्प्रयोगः।।तच्चानुमानंत्रिविधं।।के
वलान्वयिकेवलअतिरेकि।।अन्वयअतिरेकिभेदात।।यत्रसाध्यअतिरेकोनकुत्राप्यस्तिसके
वलान्वयी।।यथाघटोअभिधेयः।।प्रमेयत्वात।।इत्यत्राभिधेयत्वस्यसाध्यस्यअतिरेकाप्रसिद्धेः।।
यत्रसाध्यप्रसिद्धिः।।पक्षातिरिक्तेनास्तिसकेवलअतिरेकी।।यथापृथिवीइतरेभ्योभिद्यते०

तर्कामृत पृथिवीत्वात्॥ यत्रेतरभेदाभावस्तत्र पृथिवीत्वाभावः॥ यथा जलादि॥ व्यतिरेकव्याप्तौ तु साध्याभा
९ वो व्याप्यः हेत्वभावो व्यापकः॥ सोन्वयव्यतिरेकी यत्र साध्यं साधनाभावश्चान्यत्र प्रसिद्धः॥ यथा
पर्वतो वह्निमान् धूमादिति॥ अन्वयव्यतिरेकिणि हेतौ अवश्यं स्वपंचरूपोपपन्नता पेक्षणीया॥
पक्षसत्वं सपक्षसत्वं विपक्षव्यावृत्तत्वं अबाधितत्वं असत्प्रतिपक्षितत्वं चेति पंचरूपाणि॥ केवलान्वयि नि
विपक्षव्यावृत्तत्वरहितं॥ केवलव्यतिरेकि सपक्षसत्वरहितं चतूरूपमेवापेक्षितं॥ यत्र साध्यसंदे
हः स पक्षः॥ यत्र साध्यनिश्चयः स सपक्षः॥ यत्र साध्याभावनिश्चयः स विपक्षः॥ साध्याभाववा
न् पक्षो बाधः॥ साध्यविरोधिसाधको हेतुः सत्प्रतिपक्षः सोपाधो पक्षसत्वाद्यन्यतमभंग आ
वश्यकः सोपाधिश्चस्य व्यभिचारितासंबंधेनउपाधिविशिष्टः॥ उपाधिश्च त्रिविधः॥ साधनाव्या
पकत्वे सति शुद्धसाध्यव्यापकः॥ साधनाव्यापकत्वे सति पक्षधर्मावच्छिन्नसाध्यव्यापकः॥ साध
नाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकश्च॥ आद्यो यथा॥ अयोगोलकं धूमवत् वन्हेः अ तर्कामृतं
त्र आर्द्रेधनप्रभववन्हिमत्वमुपाधिः॥ द्वितीयो यथा॥ वायुः प्रत्यक्षः॥ प्रत्यक्षस्पर्शाश्रयत्वात्॥ अत्र ब ९
हिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वसाध्यस्यव्यापकमुद्भूतरूपवत्वमुपाधिः॥ तृतीयो यथा॥ ध्वंसो विनाशी
त्वं

जन्यत्वात्॥ अत्र जलत्वावच्छिन्नविनाशित्वव्यापकं॥ भावत्वमुपाधिः॥ अथ हेत्वाभासाः कथ्यंते॥
सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंच हेत्वाभासाः॥ सव्यभिचारस्त्रिविधः॥ साधार
णासाधारणानुपसंहारिभेदात्॥ साध्याभाववद्वृत्तित्वं साधारणत्वं यथा॥ धूमवद्वन्हेः॥ अयोगोलकं
विपक्ष सकलसपक्षव्यावृत्तत्वमसाधारणत्वं॥ यथा पर्वतो वन्हिमान् पर्वतत्वात्॥ सर्वपक्षकेवलं अनुप
संहारित्वं॥ यथा सर्वं प्रमेयं अभिधेयत्वात्॥ साध्याभावव्याप्तो हेतुर्विरुद्धः यथा शब्दो नित्यः॥ सा
वयवत्वात्॥ सत्प्रतिपक्षो यथा॥ पर्वतो वन्हिमान् धूमात्॥ पर्वतो वन्ह्यभाववान्॥ महानसत्वात्॥
असिद्धस्त्रिविधः॥ आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्च॥ यत्र पक्षो सन्॥ सिद्धसाधनत्वा
स आश्रयासिद्धः॥ यथा शशविषाणं नित्यं अजन्यत्वात्॥ शरीरहस्तादिमत्॥ हस्तादिमत्त्वया प्रती
यमानत्वात्॥ [redacted] यत्र पक्षावृत्तिर्हेतुः॥ स स्वरूपासिद्धः॥ यथा पर्वतो वन्हिमान्॥ महानसत्वा
त्॥ स च विशेषणासिद्धविशेष्यासिद्धभागासिद्धस्वरूपभेदात् बहुविधः॥ आद्यो यथा॥ शब्दो नित्यः॥
चाक्षुषत्वे सति जन्यत्वात्॥ द्वितीयो यथा॥ शब्दो नित्यः गुणत्वे सति परमाणुवृत्तित्वात्॥ तृतीयो य
था॥ एतानि द्रव्याणि॥ निरवयवत्वात्॥ बाधो यथा॥ ह्रदो वन्हिमान् द्रव्यत्वात्॥ एतेन एतदा

तर्कामृतं १०

घटादिवादहेतुः सद्धेतुः ।। ।।उपमितिकरणमुपमानं।।कीदृशो गवय इति प्रश्ने गोसदृशो गवय इत्युक्
त्तरितियदा गोसदृशं प्राणिनं पश्यति तदा पूर्वोक्तवाक्यार्थस्मरणानंतरं अयं गवयपदवाच्य इतियः
शक्तिग्रहः सा उपमितिः ।। ।आप्तोक्तः शब्दः प्रमाणं।।प्रकृतवाक्यार्थगोचरयथार्थज्ञानवानाप्तः।।
पदज्ञानं करणं॰पदार्थोपस्थितिर्व्यापारः आकांक्षायोग्यतासत्तितात्पर्यज्ञानानि सहकारिका
रणानि फलं शाब्दबोधः।।स्वरूपयोग्यत्वे सति अजनितान्वयबोधकत्वमाकांक्षा।।तेन घटः क
र्मत्वमानयनं कृतिरित्यत्र नान्वयबोधः स्वरूपायोग्यत्वात्।।अयमेति पुत्रो राज्ञः पुरुषोऽपसा
३ र्यतामित्यत्र राज्ञः पुरुषमितिना न्वयबोधः।पुत्रेणाजनितान्वयबोधकत्वात्।।बाधकप्रमा
विरहो योग्यता तेन वह्निना सिंचतीत्यत्र नान्वयबोधः।।अयोग्यत्वात्।।अव्यवधानेनान्वयप्र
तियोग्योपस्थितिरासत्तिः।।तेन गिरिर्भुक्तं महानग्निमान देवदत्तेनेत्यत्र नान्वयबोधः।।तत्तदर्थप्रतीती
च्छया उच्चारितत्वं तात्पर्यं तेन भोजनप्रकरणे सैंधवमानयेत्युक्ते अश्वानयने बोधो न भवति।।
इत्यादिना शब्देन नान्वयबोधो जायते।वृत्तिर्द्विधा।।शक्तिर्लक्षणा च।।शक्तिर्घटादिपदस्य घटादौ।। तर्कामृतं
लक्षणा यथा।।गंगायां घोषः प्रतिवसतीत्यत्र गंगापदार्थप्रवाहे घोषवासान्वयानुपपत्त्या गंगा। १०

पदस्यतीरेलक्षणाकल्प्यतेतयाहृत्याउपस्थितेतीरेघोषःप्रतिवसतीत्यन्वयबोधोभवति।।गौणीह
तिरपिलक्षणैव० यथाग्निर्माणवकोगौर्वाहीकः।।अत्रलक्षणयाशूरत्वादिसादृश्यंप्रतीयते।।उ
त क्तंपदंचतुर्विधं।यौगिकंरूढंयोगरूढंयौगिकरूढंच।आद्यंयथा।।पाचकादिपदंयोगार्थेन
पाककर्तरिशक्तं।।द्वितीयंयथा।।विप्रादिपदंब्राह्मणवाचकं।।तृतीयंयथा।।पंकजादिपदंयोगरूढ्या
पंकजनिकर्तृत्वेनपद्मत्वेनचपद्मवाचकं।।चतुर्थंयथा।।उद्भिदपदंयौगिकं।।[illegible] अंकुरवाचकं।। रूढं या
लक्षणाद्विविधा।।जहत्स्वार्थाअजहत्स्वार्थाच।।आद्यायथा।।गंगायांघोषइत्यादौ।।द्वितीयास ग विशे
वैछत्रिणोयांतीत्यादौ।छत्रिणस्तदितरस्यापिगमनान्वयः।।अथशाब्दबोधप्रक्रिया।।देवदत्तोग्रामं षे
गच्छतीत्यत्रग्रामकर्मकगमनजनकवर्तमानकृतिमानित्यन्वयबोधः।।द्वितीयायाअर्थःकर्मत्वं।।धातो
र्गमनंजनकत्वंसंसर्गमर्यादालभ्यं।।लटोवर्तमानत्वं।।आख्यातस्यकृतिः।।तत्संबंधःसंसर्गमर्यादालभ्यः।
यत्रकर्तरिक्तबोधः।।तत्राख्यातस्यआश्रयादौलक्षणा।।यथारथोगच्छतीत्यत्रगमनजनकवर्तमानव्या
पारवानर्थःदधिपश्येत्यादौद्वितीयालोपस्थलेदधिशब्दएवाजहत्स्वार्थलक्षणयादधिकर्मत्वं

तपदोपस्थापयेत्यन्वेति

तर्कामृत ११ चोपस्थापयति॥एकवचनाद्युपस्थितमेकत्वादि सर्वत्र प्रथमान्तपदमुपस्थापयति॥देवदत्तेनग
म्यते ग्राम इत्यस्य देवदत्तवृत्तिकृतिजन्यगमनजन्यफलशाली ग्राम इत्यर्थः॥वृत्तित्वं संसर्गबललभ्यं
तृतीयायाश्च कृतिः॥जन्यत्वं संसर्गः॥गमनं धात्वर्थः॥जन्यत्वं संसर्गः॥फलं कर्मात्मनेपदार्थः॥शालि
त्वं संसर्गः॥भावप्रत्यये तु देवदत्तेन स्वप्यत इत्यस्य देवदत्तवृत्तिकृतिजन्यः स्वाप इत्यर्थः॥भावप्रत्ययस्थ
ले फलाभावादात्मनेपदार्थो न भासते॥भविष्यत्वं लृडर्थः॥तच्च विद्यमानप्रागभावप्रतियोग्युत्पत्ति
कत्वं तेन गमिष्यतीत्यत्र विद्यमानप्रागभावप्रतियोग्युत्पत्तिर्गमनानुकूलकृतिमानित्यर्थः॥लुडर्थः ५५
अनद्यतनत्वमपि॥लुङर्थः॥उत्पत्तिर्भूतत्वं च॥भूतत्वमतीतत्वं॥तच्चोत्पत्तावन्वेति॥तथा च विद्यमा
नध्वंसानद्यतनत्वमतीतत्वं चार्थः॥विधिलिङर्थः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्टसाध
नत्वं॥स्वर्गकामो यजेतेत्यादौ कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनयागकः स्वर्गकाम इत्यर्थः॥
आशीर्लिङ्लोटोरर्थः वक्त्रिच्छाविषयत्वं तेन घटमानयेत्यत्र घटकर्मकमदिच्छाविषयानयनानुकू तर्कामृतं
लकृतिमांस्त्वमित्यन्वयः॥व्याप्यक्रियया व्यापकक्रियाया आपादनं लृङर्थः तात्पर्यवशात् क्व ११
५८ सप्रतियोगिकत्वं लडर्थः लिटोऽपि परोक्षत्वमतीतत्वं चार्थः तदन्वयः पूर्ववदुपपत्तौ॥ ४

चिद्रूतत्वं क्वचिद्विषयत्वं लङा बोध्यते॥ स न करोति इच्छार्थः॥ सन्तु तराख्यातस्याश्रयत्वे लक्षणा॥ स विषय
कार्थप्रकृतिकाख्यातस्य लक्षणायामाश्रयत्वे घटं जानातीत्यादौ क्लसवात॥ यङार्थः यो नः पुन्यं त... दा ३
नीतन प्रकृत्यर्थसजातीयक्रियांतरध्वंसकालीनत्वे सति वर्त्तमानादि इति विषयत्वं पापच्यत इत्या
३ दौ तादृशकालीनत्वमेव यङा प्रत्याय्यते आख्यातस्य चरमदलवाचकत्वात् न विशिष्टवाचकत्वं य
ङः॥ तदानींतनत्वं च स्थूलकालमादाय॥ पूर्वकालीनत्वं च क्त्वाच प्रत्ययार्थः पूर्वत्वं च सन्निहितक्रिया
पेक्षया बोध्यं तत्पूर्वकालीनत्वं तत्प्रागभावकालवृत्तित्वं तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्ति
त्वं वा॰ तेन भुक्त्वा व्रजतीत्यत्र गमनप्रागभावावच्छिन्नकालवृत्तिभोजनकर्त्ताभिन्नो व्रजतीत्यर्थः समानवि
भक्तिकत्वाभेदेन धर्मिवाचकत्वात्॥ अव्ययत्वेन क्त्वापरविभक्तिलोपात्॥ कालस्यात्यवेवशात्
व्यवहितायवहितसाधारण्येन बोध्यं तेन पूर्वस्मिन्नब्दे गतोऽस्मिन्नब्दे समागत इत्यत्र तादृशा
प्रयोगावगमः॥ इष्ट्वा वा न तु सुनाथ भोक्तुं व्रजतीत्यस्य भोजने छावान् व्रजतीत्यर्थः॥ भोक्तुमिच्छती
यत्र कर्त्तरि लक्षणा॥ भोजनकर्त्तारमात्मनं इच्छतीत्यर्थः॥ सविशेषणे हीति न्यायात् विशेषणे कृता वि

कर्त्रै

तर्कामृतं
१२

ष्ठान्वयः॥प्रकृतधात्वर्थकर्त्ता शतृशानचोः॥धात्वर्थजन्यफलवान्कर्मशानचोर्थः॥शत्रादीनांकर्त्ता
वाच्यः॥सविषयप्रकृतिकानामाश्रयलक्षणा॥एवंकर्तृकर्मकृतांतेनरूपेणकर्त्ताकर्मचवाच्यं॥सावक्त
तातुल्युट्घञादीनांप्रयोगसाधकत्वमात्रं॥धात्वर्थातिरिक्तस्यप्रावच्छिन्नतानुपस्थानादिति॥ननुनील
घटमानयेत्यादौद्वितीयाद्वयश्रवणात्कर्मद्वयबोधापत्तिः॥नतुविशिष्टस्यकर्मत्वमितिचेन्न॥तत्रवि
शेषणा॥किंनाकिंःसाधकत्वाय॥अथवाविशेषणविस्पकरमेदार्थः॥अत्रायंविशेषः॥द्वितीयपक्षेवाक्य
समासयोःपर्यायत्वंनघटते॥वाक्येनीलंघटमित्यादौअमपदस्यपदार्थत्वेनसंकेतत्वात्॥नसंसर्गत्वं॥ प्रकारता
नीलघटमित्यादौकर्मधारयलक्षणायाअस्वीकारात्पदस्यापदार्थत्वेसंसर्गत्वात्॥तथाचवाक्यसमास
योःपर्यायत्वानुरोधेनषष्ठीसमासराजपुरुषइत्यादौषष्ठ्यर्थसंबंधेलक्षणानघटतेसंबंधस्यसं
सर्गमर्यादालभ्यत्वात्॥वस्तुतस्तुविरुद्धविभक्तिकत्वेनवरुद्धस्यासपदबाधकत्वमुक्तंतर्केस्यार्थराजाप
दस्यबाधेनराजपदस्यराजसंबंधिनिलक्षणा॥एवंबहुव्रीहौचरमपदस्यान्यपदार्थेलक्षणा॥तथा
द्वंद्वकर्मधारयान्यसमासेसर्वत्रतत्तदर्थेलक्षणा॥एवंनञोयोसावाघटंभूतलमित्यादौघटे

तर्कामृतं
१२

मिन्नेलक्षणा॥नकलंजंभक्षयेदित्यादौबलवदनिष्टजनकेलक्षणा॥क्रियासंगतस्यैवकारस्यअत्यंतायो
गव्यवच्छेदार्थः॥यथानीलंसरोजंभवतीत्र॥विशेषणसंगतस्यायोगव्यवच्छेदः॥यथाशंखःपांडुरएवेति
॥विशेष्यसंगस्यान्ययोगव्यवच्छेदः॥पार्थएवधनुर्धरइत्यादौ॥एवंदिशासर्वंबोध्यमिति॥ ॥
इतिश्रीजगदीशभट्टाचार्यविरचितंतर्कामृतंसमाप्तिमगमत्॥रामः॥ ॥शुभमस्तु॥ ॥ॐ॥
इदंपुस्तकंश्री[redacted]गुरुस्वामिनां॥ ॥वेंकामहादेवेनलिखितं॥ ॥ॐ॥ ॥ॐ॥ ॥